कुंडविचारः

॥श्रीः॥ अथपद्मकुंडमाह॥ स्वस्येष्टेति॥ स्वस्येष्टेचतुरस्रकेरसलवंवृत्तंहिसाकर्णि
काभवेत्तस्माद्द्विगुणंचकेसरधरातद्द्विघ्नमन्यद्भवेत्॥ पादोनांश्चतुरंशकान्लवरसक्षो
णीलवन्यूनितान्संवर्ध्योभयतस्तदर्धगुणतोवृत्तंतुरीयंचरेत्॥ ४८॥ ॥इष्टचतुर
स्रमध्येषडंशपरिमितंवृत्तंसाभ्रःकर्णिकाभवेत्॥ तस्माद्द्विगुणंतस्मात्कर्णिकावृत्त
द्द्विगुणंद्वादशांशिरंशोःपरिमितंपरंवृत्तंकुर्यात्साकेसरधराकेसरभूर्भवेत्॥ तद्द्विघ्नम
न्यद्भवेत्॥ तस्मात्केसरवृत्ताद्द्विघ्नंद्विगुणंचतुर्विंशत्यंशोःपरिमितंतृतीयंवृत्तमन्यद्भवे
त्॥ चतुर्थंवृत्तमाह॥ पादोनांश्चतुरंशकानिति॥ एकांशस्यैयःपादश्चतुर्थांशस्तेनोनां

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

श्चतुरंशकानर्थात्तृतीयवृत्तात्संवर्ध्यतुरीयवृत्तंचरेदित्यन्वयः।चतुरंशान्विशोन
ष्टिलवरसक्षोणीलवन्यूनितानितिलवस्यैणकांशस्ययोरसक्षोणीलवःषोडशांश
स्तेनोनितान्न्यूनानित्यर्थः।तथाचैकहस्तमितेकुंडेत्रीण्यंगुलानिश्यवपयूका४।
पूर्ववृत्ताद्वर्धनीयास्तेनयूकाचतुष्टयसहितपंचयवाधिकपंचदशांगुलैर्मितव्यासा
र्धेनांत्यंवृत्तंकुर्यादितिफलितं॥८॥ ॥दिक्सूत्राणिविदिगतानिचतथामध्यैतेषां च२
पुनर्यावद्बाह्यविवृत्तंभवतिसत्सूत्राण्यथास्फालयेत्॥दिक्कोणस्थगुणेस्तती ७
यपरिधौसंजातमत्स्याष्टकात्त्र्यस्राण्यष्टलिखेत्तुरीयवलयंयावत्समंतात्समं॥९॥

दिग्विदिक्षुतदंतरालेचाष्टसूत्रास्फालनमाह॥दिग्विदिगतानिचत्वारिसूत्राणिते
षांसूत्राणांमध्येपुनश्चत्वारीत्येवमष्टौसूत्राणिबाह्यवृत्तपरिधिपर्यंतमास्फालयेद्
यादित्यर्थः।अष्टत्र्यस्रकरणमाह॥दिक्कोणस्थगुणैर्दिग्विदिगतगुणैःकृत्वातृतीय
परिधौजातंयन्मत्स्याष्टकंतस्मात्तुरीयवलयंयावच्चतुर्थवृत्तपरिधिपर्यंतंसमंतात्
तृतीयवृत्तपरिधिसमंतात्समंयथास्यात्तथाष्टत्र्यस्राणिलिखेदित्यन्वयः॥९॥ ॥
कर्णस्त्र्यस्रस्यमध्येकनसमवहितःस्यात्ततोंताच्चमत्स्यादाद्याकर्णार्धसूत्रान्निमि
त्तंभवतित्र्यस्रमध्येपरोपि॥तस्मादंकात्त्रिकोणांतनदृहचबहिस्त्र्यस्रतस्तत्रबा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

स्यान्मध्ये त्र्यस्रस्यचापंपरतिमितइदंबाह्यतोवेपरीत्यात्॥६०॥ ॥पत्राणांवक्रता
र्थमत्स्यकरणमाह॥एवंभागेपरेपिहयमिहधनुषोस्यान्ततोमध्यरेखासंमार्ग
स्त्रमेवंवसुदलमथवावेदपत्रंहिकुंडं॥अल्पत्र्यस्रस्यकर्णैःसमांशैर्यामध्येअं न२
कनसमवहितश्चिह्नयुक्तःस्यात्ततोंकाच्चत्र्यस्रकर्णैश्चिह्नान्मत्स्यादाद्यात्।
चकारोत्रभिन्नक्रमसूचकः।तेनत्र्यस्रकर्णैरंभकमत्स्याच्चेतिफलितोर्थः।कर्णो
र्धसूत्रात्त्रिकोणकर्णार्धमितसूत्रेणकर्कटेनवाद्दृहमहत्त्र्यस्रमध्येतिमिर्म
स्यःकार्यइत्यर्थः।तस्मादंकात्कर्णार्धचिह्नात्त्रिकोणांताच्चाल्पत्र्यस्राद्बहिःपरो २

प्यन्योपिमत्स्यःकार्यइत्यर्थः।बाह्यान्मध्येत्र्यस्रस्यचापमितिबाह्यमत्स्यादल्पत्र्यस्र
स्यमध्येधनुःचापंकुर्यात्।परतिमितोमहत्त्र्यस्रमत्स्यतःबाह्यतोवेपरीत्यात्।अ
ल्पत्र्यस्राद्बहिःकर्णार्धज्याकंइदंचापंधनुःकुर्यादित्यर्थः।एवमित्यनेनपूर्वोक्तमत्स्या
दिकरणेकर्तव्यताउच्यते।परभागेपिपरकर्णेपिधनुर्द्वयंस्यात्ततःधनुर्द्वयकरणो
त्तरंमध्यरेखासंमार्जनात्कर्णसूत्ररेखामार्जनाद्वसुदलंअष्टदलंवेदपत्रंचतुःपत्रंवा
कुंडंकुर्यात्॥६१॥ ॥यदावेदकोणंतदातुर्यवृत्तंचतुष्कोणकर्णार्धसूत्रेणकृत्वा॥ततो
दिग्विदिक्सूत्रदानेनवृत्तेतृतीयेविदिग्जातमत्स्येभ्यस्थं॥चतुर्दिक्षुवृत्तंचतुर्थेचयाव

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

स्तुचत्वारिपत्राणिकुर्यात्कर्जंस्यात्॥६१॥ अथचतुर्दलंपद्मकुंडमाह।यदेति।यदावेदपत्रं
चतुःपत्रंपद्मकुंडंतदेष्टचतुरस्रकर्णार्धसूत्रेणकर्कटेनवातुर्यरत्नंचतुर्थरत्नंकृत्वाततःदि
ग्विदिक्षुचतुःसूत्रदानेनतृतीयेरत्नेदिग्विदिग्ज्ञानमत्स्येभ्यःसकाशादित्थंपूर्वोक्तप्रकारेण
चतुर्थरत्नंयावच्चतुर्दिक्षुसुष्टुचत्वारिपत्राणिकुर्यात्।एवंकृतेकर्जंस्यात्पद्मंभवेदित्यर्थः।अ
स्मिन्पक्षेतद्दलपद्मकुंडोक्तचतुर्थरत्नव्यासाधिकमिष्टचतुरस्रकर्णसूत्रव्यासंचतुर्थर
त्नंकृत्वादिग्विदिक्षुचत्वारिसूत्राणिदत्वापरिधिविदिग्गतमत्स्येभ्यश्चतुर्दिक्षुदिक्सूत्रांतं
त्वारित्र्यस्रपत्राणिकृत्वाविदिग्गतत्र्यस्रपत्राणांमार्जनंकार्यमितिविशेषःशेषंप्राग्वत्॥
॥६१॥ ॥